শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।

ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ৪৫

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥ শ্রীমন্নারাযণীযম্ ॥

## দশক - ৪৫

*বালক্রীডাৱর্ণনম্*

অযি সবল মুরারে পাণিজানুপ্রচারৈঃ কিমপি ভৱনভাগান্ ভূষযন্তৌ ভৱন্তৌ।
চলিতচরণকঞ্জৌ মঞ্জুমঞ্জীরশিঞ্জা শ্রৱণকুতুকভাজৌ চেরতুশ্চারুৱেগাত্॥ ১ ॥

মৃদু মৃদু ৱিহসন্তাৱুন্মিষদ্দন্তৱন্তৌ
ৱদনপতিতকেশৌ দৃশ্যপাদাব্জদেশৌ।
ভুজগলিতকরান্তৱ্যালগত্ কঙ্কণাঙ্কৌ
মতিমহরতমুচ্চৈঃ পশ্যতাং ৱিশ্বনৃৃণাম্॥ ২ ॥

অনুসরতি জনৌঘে কৌতুকৱ্যাকুলাক্ষে
কিমপি কৃতনিনাদং ৱ্যাহসন্তৌ দ্রৱন্তৌ।
ৱলিতৱদনপদ্মং পৃষ্ঠতো দত্তদৃষ্টী
কিমিৱ ন ৱিদধাথে কৌতুকং ৱাসুদেৱ॥ ৩ ॥

দ্রুতগতিষু পতন্তাৱুত্থিতৌ লিপ্তপঙ্কৌ
দিৱি মুনিভিরপঙ্কৈঃ সস্মিতং ৱন্দ্যমানৌ।
দ্রুতমথ জননীভ্যাং সানুকম্পং গৃহীতৌ
মুহুরপি পরিরব্ধৌ দ্রাগ্যুৱাং চুম্বিতৌ চ॥ ৪ ॥

স্নুতকুচভরমঙ্কে ধারযন্তী ভৱন্তং
তরলমতি যশোদা স্তন্যদা ধন্যধন্যা।
কপটপশুপ মধ্যে মুগ্ধহাসাঙ্কুরং তে
দশনমুকুলহৃদ্যং ৱীক্ষ্য ৱক্ত্রং জহর্ষ॥ ৫ ॥

তদনু চরণচারী দারকৈসসাকমারা-
ন্নিলযততিষু খেলন্ বালচাপল্যশালী।

ভৱনশুককৰিলালান্ ৱতসকাংশ্চানুধাৱন্
কথমপি কৃতহাসৈৰ্গোপকৈৰ্ৱাৰিতোভূঃ॥ ৬ ॥

হলধৰসহিতস্তৱং যত্ৰ যত্ৰোপযাতো
ৱিৱশপতিতনেত্ৰাস্তত্ৰ তত্ৰৈৱ গোপ্যঃ।
ৱিগলিতগৃহকৃত্যা ৱিস্মৃতাপত্যভৃত্যা
মুৰহৰ মুহুৰত্যন্তাকুলা নিত্যমাসন্॥ ৭ ॥

প্ৰতিনৱনৱনীতং গোপিকাদত্তমিচ্ছন্
কলপদমুপগায়ন্ কোমলং ক্বাপি নৃত্যন্।
সদয়যুৱতিলোকৈৰৰ্পিতং সৰ্পিৰশ্নন্
ক্বচন নৱৱিপক্বং দুগ্ধমপ্যাপিবস্তৱম্॥ ৮ ॥

মম খলু বলিগেহে যাচনং জাতমাস্তা-
মিহ পুনৰবলানামগ্ৰতো নৈৱ কুৰ্ৱে।
ইতি ৱিহিতমতিঃ কিং দেৱ সন্ত্যজ্য যাচ্ঞাং
দধিঘৃতমহৰস্তৱং চাৰুণা চোৰণেন॥ ৯ ॥

তৱ দধিঘৃতমোষে ঘোষযোষাজনানা-
মভজত হৃদি ৰোষো নাৱকাশং ন শোকঃ।
হৃদয়মপি মুষিত্বা হৰ্ষসিন্ধৌ ন্যধাস্তৱং
স মম শময় ৰোগান্ ৱাতগেহাধিনাথ॥ ১০ ॥

শাখাগ্ৰেথ ৱিধুং ৱিলোক্য ফলমিত্যংং বালং চ তাতং মুহুঃ
সংপ্ৰাৰ্থ্যাথ তদা তদীয় ৱচসা প্ৰোতক্ষিপ্ত বাহৌ ত্বয়ি।
চিত্ৰং দেৱ শশী স তে কৰমগাত্ কিং ব্ৰূমহে সম্পত-
জ্জ্যোতিৰ্মণ্ডলপূৰিতাখিলৱপুঃ প্ৰাগা ৱিৰাডৰূপতাম্॥ ১১ ॥

কিং কিং বতেদমিতি সংভ্ৰম ভাজমেনং
ব্ৰহ্মাৰ্ণৱে ক্ষণমমুং পৰিমজ্জ্য তাতম্।
মায়াং পুনস্তনয়মোহময়ীং ৱিতন্ৱ-
ন্নানন্দচিন্ময় জগন্ময় পাহি ৰোগাত্॥ ১২ ॥

**********